# ॥ वाल्मीकि रामायण॥

## ४ किष्किन्धाकाण्ड

### अध्याय ४९

सह ताराङ्गदाभ्यां तु सङ्गम्य हनुमान्कपिः ।
विचिनोति स्म विन्ध्यस्य गुहाश्च गहनानि च ॥१॥

सिंहशार्दूलजुष्टाश्च गुहाश्च परितस्तथा ।
विषमेषु नगेन्द्रस्य महाप्रस्रवणेषु च ॥२॥

तेषां तत्रैव वसतां स कालो व्यत्यवर्तत ॥३॥

स हि देशो दुरन्वेषो गुहा गहनवान्महान् ।
तत्र वायुसुतः सर्वं विचिनोति स्म पर्वतम् ॥४॥

परस्परेण रहिता अन्योन्यस्याविदूरतः ।
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥५॥

मैन्दश्च द्विविदश्चैव हनुमाञ्जाम्बवानपि ।
अङ्गदो युवराजश्च तारश्च वनगोचरः ॥६॥

गिरिजालावृतान्देशान्मार्गित्वा दक्षिणां दिशम् ।
क्षुत्पिपासा परीताश्च श्रान्ताश्च सलिलार्थिनः ।
अवकीर्णं लतावृक्षैर्ददृशुस्ते महाबिलम् ॥७॥

ततः क्रौञ्चाश्च हंसाश्च सारसाश्चापि निष्क्रमन् ।
जलार्द्राश्चक्रवाकाश्च रक्ताङ्गाः पद्मरेणुभिः ॥८॥

ततस्तद्बिलमासाद्य सुगन्धि दुरतिक्रमम् ।
विस्मयव्यग्रमनसो बभूवुर्वानरर्षभाः ॥९॥

सञ्जातपरिशङ्कास्ते तद्बिलं प्लवगोत्तमाः ।
अभ्यपद्यन्त संहृष्टास्तेजोवन्तो महाबलाः ॥१०॥

ततः पर्वतकूटाभो हनुमान्मारुतात्मजः ।
अब्रवीद्वानरान्सर्वान्कान्तार वनकोविदः ॥११॥

गिरिजालावृतान्देशान्मार्गित्वा दक्षिणां दिशम् ।
वयं सर्वे परिश्रान्ता न च पश्यामि मैथिलीम् ॥१२॥

अस्माच्चापि बिलाद्धंसाः क्रौञ्चाश्च सह सारसैः ।
जलार्द्राश्चक्रवाकाश्च निष्पतन्ति स्म सर्वशः ॥१३॥

नूनं सलिलवानत्र कूपो वा यदि वा ह्रदः ।
तथा चेमे बिलद्वारे स्निग्धास्तिष्ठन्ति पादपाः ॥१४॥

इत्युक्तास्तद्बिलं सर्वे विविशुस्तिमिरावृतम् ।
अचन्द्रसूर्यं हरयो ददृशू रोमहर्षणम् ॥१५॥

ततस्तस्मिन्बिले दुर्गे नानापादपसङ्कुले ।
अन्योन्यं सम्परिष्वज्य जग्मुर्योजनमन्तरम् ॥१६॥

ते नष्टसंज्ञास्तृषिताः सम्भ्रान्ताः सलिलार्थिनः ।
परिपेतुर्बिले तस्मिन्कं चित्कालमतन्द्रिताः ॥१७॥

ते कृशा दीनवदनाः परिश्रान्ताः प्लवङ्गमाः ।
आलोकं ददृशुर्वीरा निराशा जीविते तदा ॥१८॥

ततस्तं देशमागम्य सौम्यं वितिमिरं वनम् ।
ददृशुः काञ्चनान्वृक्षान्दीप्तवैश्वानरप्रभान् ॥१९॥

सालांस्तालांश्च पुंनागान्ककुभान्वञ्जुलान्धवान् ।
चम्पकान्नागवृक्षांश्च कर्णिकारांश्च पुष्पितान् ॥२०॥

तरुणादित्यसङ्काशान्वैदूर्यमयवेदिकान् ।
नीलवैदूर्यवर्णाश्च पद्मिनीः पतगावृताः ॥२१॥

महद्भिः काञ्चनैर्वृक्षैर्वृतं बालार्क संनिभैः ।
जातरूपमयैर्मत्स्यैर्महद्भिश्च सकच्छपैः ॥२२॥

नलिनीस्तत्र ददृशुः प्रसन्नसलिलायुताः ।
काञ्चनानि विमानानि राजतानि तथैव च ॥२३॥

तपनीयगवाक्षाणि मुक्ताजालावृतानि च ।
हैमराजतभौमानि वैदूर्यमणिमन्ति च ॥२४॥

ददृशुस्तत्र हरयो गृहमुख्यानि सर्वशः ।
पुष्पितान्फलिनो वृक्षान्प्रवालमणिसंनिभान् ॥२५॥

काञ्चनभ्रमरांश्चैव मधूनि च समन्ततः ।

मणिकाञ्चनचित्राणि शयनान्यासनानि च ॥ २६॥

महार्हाणि च यानानि ददृशुस्ते समन्ततः ।
हैमराजतकांस्यानां भाजनानां च सञ्चयान् ॥ २७॥

अगरूणां च दिव्यानां चन्दनानां च सञ्चयान् ।
शुचीन्यभ्यवहार्याणि मूलानि च फलानि च ॥ २८॥

महार्हाणि च पानानि मधूनि रसवन्ति च ।
दिव्यानामम्बराणां च महार्हाणां च सञ्चयान् ।
कम्बलानां च चित्राणामजिनानां च सञ्चयान् ॥ २९॥

तत्र तत्र विचिन्वन्तो बिले तत्र महाप्रभाः ।
ददृशुर्वानराः शूराः स्त्रियं कां चिददूरतः ॥ ३०॥

तां दृष्ट्वा भृशसन्त्रस्ताश्चीरकृष्णाजिनाम्बराम् ।
तापसीं नियताहारां ज्वलन्तीमिव तेजसा ॥ ३१॥

ततो हनूमान्गिरिसंनिकाशः
कृताञ्जलिस्तामभिवाद्य वृद्धाम् ।
पप्रच्छ का त्वं भवनं बिलं च
रत्नानि चेमानि वदस्व कस्य ॥ ३२॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com